STOTRADHWANI

LEARN CORRECTLY, CHANT CONFIDENTLY

# ४. पादुका सहस्रम् - समर्पण पद्धतिः (२०)

भजामः पादुके याभ्यां भरतस्याग्रज स्तदा ।
प्रायः प्रति प्रयाणाय प्रास्थानिक मकल्पयत् ॥ ४.१॥ १०१॥

राज्यं विहाय रघुवंश महीपतीनां
पौरांश्च पादरसिकान्पृथिवीं च रक्ताम् ।
त्वामेव हन्त चरणावनि संप्रयास्यन्
आलम्बत प्रथम मुत्तर कोसलेन्द्रः ॥ ४.२॥ १०२॥

प्राप्ते प्रयाण समये मणिपादरक्षे
पौरानवेक्ष्य भवती करुण प्रलापान् ।
मञ्जु प्रणाद मुखरा विनिवर्तनार्थं
रामं पद ग्रहण पूर्व मयाचतेव ॥ ४.३॥ १०३॥

मत्वा तृणाय भरतो मणिपादरक्षे
रामेण तां विरहितां रघुराजधानीम् ।
त्वामेव सप्रणय मुज्जयिनी मवन्तीं
मेने महोदयमयीं मधुरा मयोध्याम् ॥ ४.४॥ १०४॥

रामात्मनः प्रतिपदं मणिपादरक्षे
विश्वम्भरस्य वहनेन परीक्षितां त्वाम् ।

विश्वस्य देवि वहने विनिवेशयिष्यन्
विस्रब्ध एवं भरतो भवतीं ययाचे ॥ ४.५॥ १०५॥

भक्त्या परं भवतु तद्भरतस्य साधोः
त्वत्प्रार्थनं रघुपतौ मणिपादरक्षे ।
केनाशयेन स मुनिः परमार्थ दर्शी
भद्राय देवि जगतां भवती मवादीत् ॥ ४.६॥ १०६॥

रामे वनं व्रजति पङ्क्तिरथे प्रसुप्ते
राज्यापवाद चकिते भरते तदानीम् ।
आश्वासयेत् क इव कोसल वासिन स्तान्
सीतेव चेत् त्वमपि साहसवृत्ति रासीः ॥ ४.७॥ १०७॥

पादावनि प्रभवतो जगतां त्रयाणां
रामादपि त्वमधिका नियतं प्रभावात् ।
नो चेत् कथन्नु भरतस्य तमेव लिप्सोः
प्रत्यायनं परिपणं भवती भवित्री ॥ ४.८॥ १०८॥

मन्ये नियुज्य भवतीं मणिपादरक्षे
पार्ष्णि ग्रहस्य भरतस्य निवारणार्थम् ।
रत्नाकरं सपदि गोष्पदयन् विजिग्ये
रामः क्षणेन रजनीचर राजधानीम् ॥ ४.९॥ १०९॥

पादावनि प्रभुतरा नपराध वर्गान्
        सोढुं क्षमा त्वमसि मूर्तिमती क्षमैव ।
यत् त्वां विहाय निहताः परिपन्थिनस्ते
        देवेन दाशरथिना दशकण्ठ मुख्याः ॥ ४.१०॥ ११०॥

वाक्ये गरीयसि पितु र्विहिते ऽप्यतृप्त्या
        मातु र्मनोरथ मशेष मवन्ध्ययिष्यन् ।
मन्ये तदा रघुपति र्भरतस्य तेने
        मातस्त्वयैव मणिमौलि निवेश लक्ष्मीम् ॥ ४.११॥ १११॥

पादाम्बुजा द्विगलितां परमस्य पुंसः
        त्वामादरेण विनिवेश्य जटाकलापे ।
अङ्गी चकार भरतो मणिपादरक्षे
        गङ्गाधिरूढ शिरसो गिरिशस्य कान्तिम् ॥ ४.१२॥ ११२॥

अविकल मधिकर्तुं रक्षणे सप्तलोक्या
        रघुपति चरणेन न्यस्त दिव्यानुभावाम् ।
अभजत भरतस्त्वा मञ्जसा पादरक्षे
        मणिमकुट निवेश त्याग धन्येन मूर्ध्ना ॥ ४.१३॥ ११३॥

इयमविकल योग क्षेम सिद्ध्यै प्रजानां

अलमिति भरतेन प्रार्थिता मादरेण ।
रघुपति रधिरोह न्नभ्यशिञ्चत् स्वयं त्वां
चरण नखमणीनां चन्द्रिका निर्झरिण ॥ ४.१४॥ ११४॥

प्रणयिनि पदपद्मे गाढ माश्लिष्यति त्वां
विधिसुत कथितं तद्वैभवं ते विदन्तः ।
अनुदिन मृषयस्त्वा मर्चयन्त्यग्र्यगारे
रघुपति पदरक्षे रामगिर्याश्रमस्थाः ॥ ४.१५॥ ११५॥

नियत मधिरुरोह त्वामनाधेय शक्तिं
निजचरण सरोजे शक्ति माधातु कामः ।
स कथमितरथा त्वां न्यस्य रामो विजह्रे
द्दष दुपचित भूमौ दण्डकारण्य भागे ॥ ४.१६॥ ११६॥

रघुपति पदपद्मा द्रन्तपीठे निवेष्टुं
भरत शिरसि लग्नां प्रेक्ष्य पादावनि त्वाम् ।
परिणत पुरुषार्थः पौरवर्गः स्वयं ते
विधि मभजत सर्वो वन्दि वैतालिकानाम् ॥ ४.१७॥ ११७॥

अनन्य राजन्य निदेश निष्ठां
चकार पृथ्वीं चतुरर्णवान्ताम् ।
भ्रातुर्यियासो र्भरत स्तदा त्वां

मूर्ध्ना वहन् मूर्तिमती मिवाज्ञाम् ॥ ४.१८॥ ११८॥

यद्भ्रात्रे भरताय रङ्गपतिना रामत्व मातस्थुषा
नित्योपास्य निजाङ्घ्रि निष्क्रयतया निश्चित्य विश्राणितम् ।
योगक्षेमवहं समस्त जगतां यद्दीयते योगिभिः
पादत्राणमिदं मितम्पच कथा मह्नाय मे निह्नुताम् ॥ ४.१९॥ ११९॥

भरतस्येव ममापि प्रशमित विश्वापवाद दुर्जाता ।
शेषेव शिरसि नित्यं विहरतु रघुवीर पादुके भवती ॥ ४.२०॥ १२०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
समर्पण पद्धतिश्चतुर्थी ॥